# Bachelor of Arts Examination, 2023

(3rd Year, 5th Semester)

## SANSKRIT (Honours)

## Course – XI

## [ Vedic Text & Grammar ]

Time : Two hours Full Marks : 30

*The figures in the margin indicate full marks.*

**सर्वेषां प्रश्नानामुत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्।**

१। अधस्तनयोः प्रश्नयोः **एकस्य** उत्तरं देयम्। 6

क) वैदिकसाहित्ये अग्निदेवतायाः स्वरूपं भवदधीतमन्त्रभागमाश्रित्य सम्यक् उपपाद्यताम्।

ख) ऋग्वेदसंहितागतम् अक्षसूक्तमनुसृत्य कितवस्य करुणजीवनकथा सम्यक् उपस्थापनीया।

२। अधोलिखितः मन्त्रः ऋषिच्छन्दोदेवतानिर्देशपुरः सरं सायणभाष्यानुसारेण व्याख्यायताम्। 6

अग्निर्होता कविक्रतुः
सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरा गमत्।

३। अधोनिर्दिष्टयोः विनियोगवाक्ययोः **एकस्य** व्याख्या करणीया। 4

क) 'अग्निमीळे' इति सूक्तं प्रातरनुवाक आग्नेये क्रतौ विनियुक्तम्।

ख) तस्मिन् सूक्ते प्रथमाया ऋचो द्वितीयस्यां पवमानेष्टौ स्विष्टकृतो याज्यात्वेन विनियोगः।





४। निम्नलिखितस्य ऋग्वेदीयमन्त्रस्य पदपाठः प्रदर्शनीयः। 4

स नः पितेव सूनवे-
ऽग्ने सूपायनो भव।
सचस्वा नः स्वस्तये।

५। निम्नोद्धृतेषु पदेषु **द्वयोः** सूत्रनिर्देशपुरःसरं स्वरसञ्चरणं करणीयम्।

अग्निम्। यज्ञस्य। देवम्। 2×2=4

६। अधःस्थितानां पदानां **द्वयोः** ससूत्रं पदसाधनं करणीयम्। 2×2=4

पुरोहितम्। ऋत्विजम्। दीदिविम्।

७। अधोलिखितानां वेदिकपदानां **द्वयोः** लौकिकसंस्कृतरूपं प्रदेयम्।

देवेभिः। दिवेदिवे। स्वस्तये। 1×2=2